Volume-3, No. II, Aug-2016, pp. 69-74

# भारतीय साहित्यशास्त्रे सम्प्रदायाः

**इ अर्ककनन्दा देवी** शोधच्छात्रा पी–एच.डी.
संस्कृत विभागः उस्मानिया विश्वविद्यालयं
हैदराबाद्, तेलंगाण भारत।

**सार**

विश्वविख्यातं भारतीय साहित्यम्। वेदोऽलिखं धर्ममूलम् इत्यनेन वेदकालादारभ्य साहिती परिमलं समस्त विश्वे व्याप्ताऽभूत्। एतत् कारणादेव अपार साहिती जगत् भारतीयं इति सर्व प्रपच्चं मुक्तकण्ठेन कथ्यते। अपारेऽस्मिन संसारे दुःखदावाग्निदग्धस्य, अधिव्यधि प्रपीडितस्य मायामोह भ्रान्तचेतसो मानवस्य मनः सन्ताप निवारणाय, चेतः प्रसादाय, कर्तव्योपदेशाय, हितकारकाय, सुखवाप्तये च विद्वद्वौरेयाः तत्वाज्ञाः साहित्यिशास्त्र नामकं रत्नं वाह्मय महोदधेः सारभूतम् उददीधरन्। रत्नमेतत् चतुर्वर्गवाप्तिसाधनं ब्रह्मानन्द सहोदरं रसं आस्वाद्यतया जनयत् गौरवम् अलभत।

साहित्यशब्दः वाग्डयमित्यर्थे प्रयुज्यते। यन्नार्थे लिटरेचर् शब्दं वैदेशिकैः प्रयुज्यते। साहित्यशास्त्रं यद्यपि सौन्दर्यसास्त्रं, अलंकार शास्त्रं, काव्यशास्त्रं इत्यादि नामान्तरेण, पूर्व क्रियाविधि नाम्राति प्रोच्यते। साहित्य शब्दस्य प्रयोगे व्यापकं एवं संकुचितार्थानि स्फुरन्ति। व्यापकार्थे साहित्यं समग्रवाग्णम्यस्य पर्यायं भवति। संकुचितार्थे काव्य–नाटकादि साहित्यमिति भवति। व्यापकार्थें काव्यं, शास्त्रं द्वयोः रूपाणि विभक्तम्। काव्यं रसात्मकं अपि च शास्त्रं ज्ञानप्रधानं भवति। अनेनैव राजशेखरः साहित्यविद्या पंचमी विद्या इति मन्ये पुराण, न्याय, मीमांसा, धर्मशास्त्रादि चतुर्विद्यास्यह पंचमी स्थानं साहित्यस्य आपादितम। आचार्य कुन्तकः साहित्यशब्दस्य यथार्थ प्रतिपादनं कृत्वा तस्य मतं प्रतिपादयति एवं शब्दाऽर्थयोः विशिष्ट सम्बन्धमेव साहित्यम् इति। एतदति कथयति कुन्तकः साहित्यशास्त्रे प्रयुक्तं साहित्य शब्दं काव्य अर्थे सम्मिलितं भवतीति। काव्यं एवं साहित्य समानार्थे द्योतते।

सहितयोः शब्दार्थयोः भावः साहित्यं इत्यनेन काव्ये शब्दाऽर्थयोः उभयोः परिणतफलं अभ्दुतरूपेण लभते। तथाऽपि साहित्ये शब्दाऽर्थयोः परस्पर स्पर्धा रमणीया सुमनोहराच। तथाहि काव्ये एवं साहित्ये शब्दार्थयोः मच्जुल समन्वयं कालिदासादारभ्य अद्यतनोऽपि कबयोः लोकव्यापार रूपे प्रतिबिम्बन्ते।

शब्दाऽर्थयोः सम्पृक्त साहित्यं वैदिक साहित्येऽपि विशेषस्थानं आपादितम्। ऋग्वेदस्य वाक्सूक्ते वागद्वैतवादस्य सम्यक् प्रतिपादनम् एतत्

**अहमेव स्वमिदं ब्रवीमि जुष्टं देवेभिरूतमानुषेभिः।**
**ये कामेय तं तमग्रं वृणोमि तं ब्राह्मणं तमृषिं तं सुमेधाम्।। (ऋग्वेदः) इति**

वक्सूक्त वाण्योः विश्वरूपता, अनर्विचनीयता प्रतिपादनेन विश्वसाहित्यस्य महत्वं भजते। तत्र हि शब्दः अथच्श्च इत्युभयं मिलितं सदेव कमप्याल्हादं जनयति, न केवलः शब्दो नापि वा केवलोऽर्थः तथा चोक्तमपि न च काव्य "शास्त्रादिवत् अर्थ शब्दमात्रं प्रयुज्येते, सहितयों शब्दाऽर्थयोस्तत्र प्रयोगात्।"

सहित्यं तुल्यकक्षत्वेन 'अन्यूनानतिरिक्तवृत्तित्वम्' इति व्यक्ति विविक टीका। एर्तन साहित्यशब्दस्य काव्यस्वरूपमर्थमिति संकोचः कृतो वेद्यः। आधुनिक प्रथनुसारेण तु सर्वासासामति विद्यानां साहित्यपदाभिलप्सत्वे काव्यमात्र परकत्वेनात्र साहित्यशब्दप्रयोगोऽयुक्तः स्यात्। किच्ज बिल्हणेन–

**"साहित्यपाथो निधिमन्यनोत्थं काव्यामृतं रक्षत हे कवीन्द्राः।**
**यदस्य दैत्या इव लुण्ठनाय काव्यार्थचोराः प्रगुणीभवन्ति।।" इति स्वीयै**

विक्रमाक्डदेवचरितनामकै महाकाव्ये प्रौक्तुम्, तदापि साहित्यशब्दस्य काव्यार्थतां व्यज्चयति। साहित्यदर्पणः इति काव्यलक्षणस्वरूपादि बोधक ग्रन्थस्य नामकरणमति विद्यान्तरव्यावृत काव्यमात्र वाचकस्य साहित्यशब्दस्य साहित्यशब्दस्य प्रयोगं प्रमापयति। तदित्थं साहित्यशब्दोऽत्र काव्यमात्रपरक इति प्रतिपत्तव्यम्।

काव्यनाटकादि वाग्डंयं साहित्यम्, तत् सम्बन्धित शास्त्रं साहित्यशास्त्रम्। ईसवीय षष्टशाताब्दो अति प्राचीन आलंकारिकः भामहस्य कथनम् शब्दाऽर्थो साहितौ काव्यम् इति। शब्दाऽर्थयोः अभयोः समानार्थ सम्मेलनमेव काव्यम् इति भावम् साहित्यशब्दस्य अन्य प्रकारेणापि अर्थं दीयते। अस्मदादयः रूपकस्य प्रस्तावने भरतेनोक्तं–

**न तद् ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**
**न सौ योगो न तत् कर्म नाट्येऽस्मिन् यन्नह्श्यते।।**
(ना.सा. 2.226)

एतद्वावमेव प्रस्तावने भरतेनोक्तं

**न स शब्दो न तद्वाच्यं न स न्यायो त सा कला।**
**जायते यन्न काव्यज्ञ महो भारो महान् कवेः।।**
(काव्यालंकारं 5, 4)

टपारे काव्य जगति कविरेव प्रजापतिः स यथैव वस्तुत्वं प्रस्तोतुं ईहते, तथा प्रस्तोतुं प्रभवति। कवेर्भारती सर्वथा सवतन्त्रा, आनन्दस्वरूपा, विधि निममैरनिगडिता, नवरसरूचिरा चेति। सर्वाः कलाः, सर्वाः विद्याः काव्यस्याग्डंभूताः इति भामहेन काव्यालंकारे कवेः कर्म निर्दिशता प्रोच्यते। विविधविषयाबगाहि ज्ञानेनैव कविः इत्यनेन विश्वसाहित्य सम्मेलनं, विविध विशेष विषय समाहारं काव्यं, काव्यसम्बन्धित वाग्डयमेव साहित्यमिति नान्मा भासितम्। तत् सम्बन्धित शास्त्रमेव साहित्यशास्त्रं, इति प्रसिद्वो अभवत्। तथाऽपि शास्त्रमिदं लक्षणशास्त्रं, काव्याः तस्या लक्ष्याः। काव्य नियमशक्ति सामर्थ्यं केवलं लक्षणशासत्रमेव आपादयति। अति विस्तृत विश्र्वसाहित्ये काव्य क्रिया, कवेः कर्म एवं विधानेन भवतीति, काव्यं उत्तमं भविष्यतीति दिशानिर्देशं करोति साहित्यशास्त्राम्।

**'क्रियाकल्पं, क्रियाविधिं च'**— अति प्राचीनकाले साहित्यशास्त्रमिदं क्रियाकल्पनान्मा व्यवह्रियते स्म। रामायणादि काव्येष्वपि एतत् प्रस्तावना दृश्यते। कदाचन चतुष्षष्टिकलासु क्रियाकल्पस्य गणना कृता। तन्न क्रियया काव्यग्रन्थाः कल्पेन च विधानमभिप्रेतम् तदिदं क्रियाकल्पपदं पर्यवस्यति। तथैव पूर्वं एतत् शास्त्रं क्रियाकल्पनान्मा व्याह्रियते। ईसवीय सत्तम शताब्दे दण्डिनः, कालोऽपि क्रियाकल्पं इति नामं प्रसिद्वोऽभूत्। काव्यादर्शे दण्डिनः कल्प शब्दस्य पर्यायेन विद्या शब्द प्रयोगं कृत्वा साहित्यशास्त्रं क्रियाविधि इत्युक्तं च— वाचां विचित्रमार्गाणां निबबन्धु क्रियाविधिम् (काव्यदर्श 2.9)

**सौन्दर्यशासत्रं, अलंकारशास्त्रं वा**— सौन्दर्यमलंकारः (का.सू.1,2) इति प्रतिपादयति बामनः। सौन्दर्यं इत्युक्ते अलंकारमेव, काव्य ग्राह्यमलंकारात् (का.सू.1,2) इत्यनेन काव्यसौन्दर्यदायका उपमादि प्रयोगाः अपि अलंकारमिति नान्मा व्यवह्रियते। अत अवोच्यते वामनः करण व्युप्तया पुनरलंकार शब्दोऽयं उपमादिषु वर्तते (का.सू.1,2) इति। क्षणे क्षणे यन्नवतामुपैति तदेवरूपं रमणीयतायाः (शिशुपालबध 4,17) माघकवेः स्थूलेन वर्णनीयमिदं वाक्यं न केवलं प्राकृतिक दृष्टिया, अपितु सर्व काव्यप्रपज्च वर्णनीय सौन्दर्यरूपं निर्दिष्यति। काव्य सौन्दर्यमेव नवनवत्वशोभां प्रकाशयति, आनन्दानुभूतिं आस्वादयति, पुनः पुनः तदेव काव्यं पाठयति, इत्यनेन काव्ये सौन्दर्यमेव प्राधान्यमिति कथ्यते बामनादि लक्षणकारः। अत एव शास्त्रमिदं सौन्दर्यशास्त्रमिति नान्मा विराजते।

यदि शास्त्रमिदं सौन्दर्यशास्त्रमिति नान्मैव सप्रसिद्व— अभविष्यति किन्न तत् पाश्चात्यस्य आस्तेटिक्स प्रयोगात् साम्यरूपे द्योतते। किन्तु संकुचितार्थेन केवलं अलंकारशास्त्रं इति नान्मैव लोके व्यवह्रियतेस्म।

अलंकारशास्त्रमपि केवलं उपमादि अलंकार वर्णना शास्त्रमिति भावयन्ति सर्वम् प्रतापरूद्रीय व्याख्याकारः कुमारस्वामिनः अपि एतदेव मन्ये उक्तं च—'यद्यपि रसालंकाराद्यनेक विषयमिदं शास्त्रं तथापि छत्रिन्यायेन अलंकारशास्त्रमुच्यते ' इत्यभिप्रायं प्रकटयति। भामहः तस्य ग्रन्थस्य काव्यालंकारः इति नाम प्रकटनेन काव्यसौन्दर्य, काव्यसौन्दर्यप्रतिपादक ग्रन्थं इत्यादि अर्थानि स्पष्टी करोति। तदनन्तर लक्षणकारः वामन, रूद्रट, वाग्भटादयः अति तयोः ग्रन्थयोः नामकरणं एतदर्थे एव दीयन्ते। वामनस्तु सौन्दर्यमलंकारः इत्युकत्वा काव्यगतान् सर्वानेव ध्यनिरसगुणतत्तलंकारादीन अलंकार शब्देन सज्जग्राह। तदनुसारेण अलकांरशास्त्र पर्ययताामर्हति। तथाऽपि अलंकार मित्युक्ते सौन्दर्यमिति भावनेनैव अलंकारशास्त्रं वा सौन्दर्यशास्त्रं काऽपि नान्मा निरभ्यन्तरेन अंगीकार्यमेव भवति।

**काव्यशास्त्रम्**— साहित्यशास्त्रस्य अपरनामं काव्यशास्त्रम्। काव्ये अन्तर्गतं दृष्यकाव्यं एवं श्रव्यकाव्यं उभयोः समाहारं काव्यशास्त्रम्। किन्तु काव्यसमम्बन्धित चर्चा विशेषाः प्रस्तावितं शास्त्रमिदं काव्यविमर्शना दर्पणमिति कथ्यते विद्वद्विः। काव्यनाटकादि उत्पत्तेः, विकासनार्थ काव्य शास्त्र उत्पतिः विकासं संभवति काव्ये काधुत्वासाधुत्व लक्ष्ण निर्धारनार्थ, वक्रमार्गगमन निर्देशित संरक्षणर्थ कवित्वस्य सद्विमर्शना अपि च लक्षणरूपेण काव्यशास्त्रं आविर्भवेत्। लक्षणाः लक्ष्यभूतेन काव्यसमीक्षा क्रियते इत्यनेन लक्षणाशास्त्ररूपेणापि विराजते।

साहित्य सम्बन्धित काव्यालंकारं, काव्यालंकारसूत्रं, काव्यादर्शः अपि च काव्यप्रकाशादि ग्रन्थयोः नामकरणं स्पष्टीकरोत्येवं साहित्यशास्त्रस्य पर्यापता काव्यशास्त्र शब्दात् वर्तते। साहित्यशब्दस्य वास्तविक अर्थ काव्य शब्दमेव। काव्यशास्त्रपदस्य प्रयोगं सर्वप्रथमं श्रेंयं एकादश शाताब्दी सरस्वतीकण्ठाभरणस्य रचयिता भोजदेवः कृतवान्। सः शास्त्र शब्दस्य विधि शासनात् शास्त्रं इति व्युत्पत्यनुसारेण काव्यशास्त्र प्रयोगं समुचितमिति मन्यन्ते। अलंकार शब्दस्य अर्थ सौन्दर्य, अर्थात् काव्यसौन्दर्यमेव। तत् विवेचनीय शास्त्रं काव्यशास्त्रम। सौन्दर्यप्रदायकं काव्यं इत्यनेन सौन्दर्यशास्त्रं, काव्यशोभां अलंकुर्वन्ति इत्यनेन अलंकारशास्त्रम्। विश्ववाग्डयस्वरूपं काव्यं इत्यनेन साहित्यशास्त्रम्।

**विश्वश्रेयः काव्यं किमिति काव्यात्मा?**— शब्दार्थयोः समन्वयमेव काव्यमिति लक्षणकारस्य अभिप्रायम् अर्थानुकूलं शब्दप्रयोगः शब्दानुरूपं च अर्थ इति अत्राभिमतम्। आचार्य दण्डी भामहस्य शब्दार्थो इति विशदयत् आह— शरीरं लावदिष्टार्थ व्यवच्छिन्न पदावली (काव्यदर्श 1,10) अत्र शब्दार्थयोः पृथक् काव्यस्य आत्मानं मनुते। काव्यस्य शरीरज्ञानेऽपि तत्र कः आत्मा इति न निश्चप्रचं ज्ञायते। काव्यस्य आत्मा किमिति गवेषयद्भिः बहुभिः परवर्तिभिः आचार्यै, एवं

प्रस्तूयन्ते–काव्यस्य मूलत्वमेव वामनः कथितं काव्यात्मा इति। परन्तु किं नाम काव्यात्मा? इति तर्क वितर्कादि मीमासानन्तरं आलकंकारिकः स्वीय प्रतिभानुसारं नूतनं एकं सम्प्रदाय प्रतिस्थापना प्रतिपादनेन काव्यस्य आत्मा एवं प्रकारेण प्रकटीकुर्बन्ति। यथा वामनः रीतिरात्मा काव्यस्य इति निगदन्, आनन्द वर्धनाचार्यः कव्यस्थात्मा ध्वनिरिति प्रतिपादितवान्। रस एव आत्मा इति नाटयकाराः वदन्ति। आचार्य कुन्तकः वक्रोक्तिः काव्यजीवितम् इति साधयति। क्षेमेन्दश्च औचित्मं काव्यजीवितं इत्युच्छते। काव्यशोभाकरान् धर्मान् अलंकारान्एव प्रचछते इति प्रप्रथम अलंकार प्रयोगकर्ता भरतमुनिनः अप्पय्यदीक्षित पर्यनतं सर्वालंकारिकैः मुक्तकण्ठेन प्रतिपादयन्ति।

एतदेव भारतीय साहित्यशास्त्रे अलंकार सम्प्रदायं रस सम्प्रदायं, रीतिसम्प्रदायं, ध्वनि सम्प्रदायं, वक्रोक्ति सम्प्रदायं, औचित्यसाम्प्रदायं इत्यादि षट् सम्प्रदायाः आबिर्भवेयुः। ये सम्प्रदाय सृष्टिकर्ताः, साहित्य शास्त्रवेत्ताः एकं साम्प्रदायं पामुख्येन काव्यात्मा मन्यन्ते ते काव्यसम्बन्धित अन्यविषयानि नैव निराकरन्ति, अपितु काव्ये सर्वाशाः समीक्षा कृत्वा प्रादान्यमात्रेन तेषां स्वीय सम्प्रदरायस्य वैशिष्टयं प्रतिपादयन्ति। यदि तत् स्वीय सम्प्रदायं न भविष्यतीति सम्प्रदायशास्त्रवेत्तानां अभिप्रायम्। अतः एकैकं सम्प्रदासस्य परिचयमात्र अवलोकनं कृत्वा तस्य वैभंव दर्शयामः।

**अलंकार सम्प्रदायः–** अलंक्रियतेऽनेनेति अलंकारः, अलंकरोतीतिवा अलंकारः। अलंकाराणामपि काव्य महन्मत्वम्। एवमेव शब्दार्थयोः सौन्दर्यादायकं तत्वं अलंकारः। अलंकारः शब्दार्थयोर्नकेबलं सौन्दर्यमेव समेधयति अपितु तत्र चमत्कृतिमपि आदधाति। भारतीय साहित्यशास्त्रे भरत नाटयशास्त्रं अति प्राचीन आलंकारिक ग्रन्थम्। नाटयशास्त्रे उपमा, रूपक, दीपकमिति त्रीणि अर्थालंकाराः, यमकमिति एकं शब्दालंकारम् प्रकटितोऽभूत्। नाटयशास्त्र रचना क्री.पू. द्वितीय शताब्दात् क्री.श. तृतीय शताब्दतः सम्भवतीति आधुनिक विमर्षकस्य अभिप्रायम्।

तथाहि अलंकारस्य आविर्भावं कदा अभवत्? इति प्रश्नस्य समाधानं निश्चयेन कथितं असम्भवम्। किन्तु मानवस्य वाक् रूप क्रिया आविर्भावैव अलंकारस्यापि सृष्टि अभवत्। मानवेन दर्शितं, अनुभोक्तिव्यं वस्तुभावश्च स्वरूपं प्रकठितुं, सादृश्यस्य साहय्सं स्वीकृर्वन्ति। तत् सादृश्यरू॰ वर्णनादेव अलंकारस्य आविर्भावं सम्भवेत्। प्रपच्जभाषायां एनकेनाऽपि विषये अलंकारस्य प्रयोगं उचितमेव भवति। तथाऽपि ग्रन्थस्य अलंकारस्योदाहरणानि ऋग्वेदे एव लभ्यते। ब्राह्मण, आरण्यक, उपनिषदादि उद् ग्रन्थायामपि अलंकार प्रयोगं दृश्यते। पुराणेऽपि अति विस्तृतं इयं साहिती सृष्टिः। तथा कदाचन प्रयोगित अलंकारान् नामोलेखेन सह प्रप्रथमं भरतमुनिः शास्त्रबद्वं अकरोत्।

अलंकाराणां विकासक्रमं दृश्यते एवं–अलंकाराणां सर्वप्रथमं उल्लेखो भरतकृते नाटयशास्त्रे यमकं, रूपक, दीपकानीति चत्वारोऽलंकारा निर्दिश्यन्ते। अग्रिपुराणकर्ता षोडश (16) अलंकाराः प्रतिपादयति। भामहकृते काव्यलंकारे काव्य अलंकारस्य प्राधान्यं उक्त्वा न कान्तमसि निर्भूषं विभाति वनितामुखम् इति कथ्यते तेन सः 38 अलंकाराः निर्दिश्यन्ते। वामनकृते काव्यालंकारे 31 अलंकाराः, दण्डिनः कृते काव्यदर्शे 37 अलंकाराः, उभ्दटकृते काव्यालंकारसारसंग्रहे 41 अलंकाराश्च वर्ण्यन्ते। रूद्रटः काव्यालंकारेः 52 अलंकाराः, प्रतिपादयेत्। मम्मटः काव्यप्रकाशे 69 अलंकारान् ग्राह्य विवरणं दीयतेः एते 8 शब्दालंकाराः, 62 अर्थालंकाराः सन्ति। विश्वनाथकृते साहित्यदर्पणे 89 अलंकाराः, जयदेवस्य चन्द्रलोके 100 अलंकाराः च सत्पदश शताब्दे अप्पय्यदीक्षितस्य कुवलयानन्दं 125 अलंकारान् प्रतिपायति। पण्डितराज जगन्नाथकृते रसगंगाधरेऽपि च 180 अलंकाराः विवेच्यन्तेति विदूषानां अभिप्रायम् एवं क्रमशोऽलंकाराणां वृद्विर्लक्ष्यते। अलंकाराणां लक्षणमपि तेपु तेषु ग्रन्थेषु विद्यामानं प्राप्यते।

अलंकाराः द्विविधा विभज्यन्ते एवं शब्दालंकाराः, अर्थालंकाराश्च। एतत् अलंकारसम्प्रदायानुसारणियां मते अलंकाराः एव काव्यजीवातवः यद् अलंकार रहितस्य काव्यस्य कल्पना तथैव हास्यास्पदा, यथा उष्णत्वगुणरहितस्य वन्हेः इत्युक्तं च जयदेवः चन्द्रलोके–

"अगींकरोति यः काव्यं शब्दार्थावनलङ्कृति।
असौ न मन्यते कस्याद् अनुष्णमनलंकृति।।"(चन्द्रलोकं 28)

काव्ये जीवनादायकतया अलंकारानेव अलंकार सम्प्रदाय प्रवर्तकाः।

**रस सम्प्रदायः–** सकलप्रयोजन मौलिभूतं समनन्तरमेव रसास्वाद समुद्रतं विगलितवेद्यान्तरं आनन्दम्। आनन्दानुभूतिश्च रसास्वादमूला, रसास्वादनादेव आनन्दावाप्तिः। तैत्तिरीयोपनिषदि रसोवैसः "रसह्येवायं लब्ध्वानन्दी भवति।" (तै.उ. 2,7) इत्यनेन ब्रह्मणा रसरूपत्वं तदावाप्तौ च आनन्दोपलब्धिः वर्ण्यनते। भारतीय साहित्यशास्त्र प्रपच्जे भरतेन प्रवर्त्तितः रससिध्दान्तः एवं रससम्प्रदायं आसिदिमं परिगण्यते। नाटयशास्त्रे उक्तं मुनिना–नहि रसाद् ऋते कश्चिदर्धः प्रवर्तते, इति तत्र विभावानुभावव्यभिचारि संयोगाद् रसनिष्पतिः इत्येवं रससूत्रम्। अत्र विभावाः कारणानि, अनुभावाः कार्यानि, व्यभिचारिणश्च सहकारिणः एषां रसनिष्पन्तिः।

नाटयं नाम रूपकं एवं दृश्यकाव्यमपि कथ्यते। नाटयशास्त्रे दशविधरूपकस्य लक्षणानि, तयोः प्रयोगार्थ सम्बन्धित अनेक विषयणि प्रस्तावयति। तथैव अनेक विषयसमूहे एकं रसम्। रस्यते इसः, आस्वाद्यते इति

रसः। विभावानुभाव व्यभिचारि संयोगात् तत् रसनिष्पत्तिः भवतीति भवतीति भरतसूत्रं बहुभिः व्याख्येयुः। तत्र मतभेदोऽप्युत्पन्नः स्यात्।

यथा नानाव्यज्जनौषधि द्रव्य संयोगात् रसनिष्पत्तिः भवति। यथाहि गुडादिभिः द्रव्यैः व्यज्जनैः औषधीभिश्च षावांदयोरसाः विवर्तन्ते, तथा नानाभावोपगत। अपि स्थायिनो भावा रसत्वं आन्पुवन्ति। इति रससूत्रस्य उद्देश्यं प्रकटयति भरतमुनिः। नायिका नायकौ आलम्बन विभावौ, चन्द्रोदय उद्यानादीनि उद्दीपन विभावाः, नायकि नायकयोः कटाक्षवीक्षणादेनि अनुभावाः, तयोरेव स्वेद रोमांच इत्यादयः व्यभिचारिभावाः, एतेषां सर्वेषां संयोगः अर्थात् समावेशः रंगस्थले एवं दृश्यकाव्ये, सामाजिके यदि दृश्यते, तत् दृश्यकाव्यार्थ ग्रहणं चर्वणं आस्वादनमेव रसं इति उदाहरणपूर्वक अभिप्राय निरूपणं भरतमुनिना प्रतीयते। पश्चात् आलंकारिकाः केचन रसविषये संयोग – निष्पत्ति पदस्य निर्वचनं भिन्नरूपेण व्याचख्याः। तत्र भट्टलोल्लट, श्रीशड.कुक, भट्टनायक, भट्टतौतः अभिनवगुप्तादयः रससूत्रव्याख्यानं स्वीयमतानुसारेण कृत्तवन्तः।

श्रस सम्प्रदायमनुसरतां अपि च आलंकारिकानां मध्ये रससंख्या विषये मतभेदो दृश्यते। भरतेन शान्तरसभिन्नत् अष्टावेव रसान् नाटये स्वीकुर्वन्ति, काव्येतु शान्तोऽपि नवमो रसो मन्तव्य एव। दशमरसेन मदुर रसमपि प्राधान्यमातिष्ठन्ते केचन आचार्यः। स चायं मधुररसो भक्तिरसनान्मापि परै र्व्यवह्रियते।

रस्यते आस्वाद्यते इति रसः। सहृदय सामाजिक निष्टः रसः। अनेन साधारणीकरणेन सहृदयस्य बासना–संवादो भवति। सुषुप्तश्च स्थायीभावो निर्वैयक्तिक–रूपेणाभिव्यक्तस्सन् आनन्दस्वादं कारयति, एष एव रसास्वादं रसोऽयं सहृदयसंवेद्यः।

रीति सम्प्रदायः– रीतिर्नाम काव्ये सोन्द्रर्यधायिनी, विशिष्ठ गुणसमवेता, चमत्कृतिप्राणा, गुणाश्रया, विशिष्टापदसंघटना। रीतिर्नाम मार्गपर्यायः, पध्दतिः, शैली इत्यादयःतदर्थबोधकाः पर्यायशब्दाः। रीड् गताविति धातोः सा व्यत्पत्या रितिरूच्यते, रीतिशब्दो मार्गपर्यायः, रसोचित शब्दार्थ निबन्धनं रीतिः इति रीतिं परिभाषन्ते विद्वद्भिः।

रीति सम्प्रदायस्य प्रवर्त्तको बामनः, तन्मते रीतिरात्माकाव्यस्त इति प्रतिपादनेन व्यक्ति रेव काव्यस्याऽपि आत्मा स्यादिति कल्पना निरूपयति बामनः। भरतमुनिना नाटयशास्त्रे एव श्लेष, प्रसाद, समत, समाधि, माधुर्य, ओज, पदसौकुमार्य, अर्थव्यक्ति, उदारत, कान्ति इत्यादि दशगुणाः प्रतिपादितोऽभूत्। बामनः अपि एतदेव नामात्दश शब्दगुणाः, दश अर्थगुणाः अंगीकरोति रीतिभेदानां व्ययस्थितं वर्णनं दण्डिनाऽपि कृतम्। अलंकाराः एव काव्यशोभा प्रतिभातीति कथयन्ति दण्डीभामहादयः। किन्तु बामनेन काव्यशोभायाः कर्त्तरो धर्मागुणाः तदतिशयहेतवः अलंकाराः स्वीकृताः। वामनस्य अभिप्रायानुसारं गुणविहीन काव्यं केवलं अलंकार वर्णनादेव न शोभते, काव्यशोभायाः कर्तारो धर्मागुणाः गुणादेव काव्यसौन्दर्य विभातीति घण्टापदेन वदति वामनः।

रीतिः शब्दार्थोभयनिष्ठान् गुणान् धारयति। इयं न केवलं गुणालंकारादिभिरेव सम्बद्वा अपितु ध्वनि, वक्रोक्ति, औचित्य, रसादिभिरपि संगता। काव्यविदों रीतिं चमत्कृतिशब्देनाभिदधाति। अभिनवगुप्तः चमत्कृतिं वक्रोति बन्धं गुम्फादि शब्दं रीते पर्यायं मनुते। विशिष्टा पदरचना रीतिः, प्रणाली, शैली इत्यादयः पूर्वोक्त पर्यायवाचिनः। अद्यत्वेन शैली यदभिमतं तत् पुरा रीतिशब्देन अभिप्रेतम् आसीत्।

दण्डी प्रदेशिकं वौशिष्टयम् अनाश्रित्य गुणमूलकं रीति विभाजनं कुरूते। श्लेषादि दशगुण वैशिष्टया वैदर्भी, तद्विपरीता च गौडी इति। भामहः अपि रीतिद्वयं उल्लिखित एवं गौडीयमपि साधीयो वैदर्भमपि नान्यथा इति। कुन्तको रीतिं वेधा विभज्यति एवं वैदर्भी, गौडी, पाचांली चेति। दोषादिभिरस्पष्टा, समग्रगुणसम्पन्ना, वीणास्वरमनोहारिणी च सा वैदर्भीरीतिः। दीर्घसमासयुक्तं, पुरूषवर्णप्रयोगं, ओजो गुणाधिक्यं च सा गौडी रीतिः। माधुर्यं सौकुमार्य च गुणौ भवतस्तत्र पांचाली रीतिरिष्यते, इति रीतेः वैभवम्।

रीते एवं पदगुम्फने अनिर्वचनीय सौन्दर्य भवति। अर्थे चमत्कारं न स्यादऽपि तत् लोपं रीति सौन्दर्यं पूरयति। कवि प्रस्तावित विषये किचिंदपि विशेषं नारत्यपि रीति द्वारा किचिंत् स्यादिति भावना उदयति उक्तं च वामनः किं त्वस्ति काचिदपरैव पदनुपूर्वी, यस्यां न किचिंदपि किचिंदिवावभाति (का.सू.1,2,29)। नहि इतिवृत्तमात्र निर्वाहेण कवेरात्मपदलाभः। चमत्कृतिं वैशिष्टयं रम्यत्वं च आसादयितुं रीतिरनिवार्या। रीति कलात्यिक्याः प्रवृत्तेर्मूलम्। किचिंत् वैशिष्टयं अनाश्रित्य न कवेः कवित्वपदलाभः। रमणीयत्वं च काव्ये चमत्कृतिं आदधाति। रमणीयत्वस्य मूलं च रीतिः। एवं विज्ञायते यत् काव्ये रीतेरस्ति महन्यहत्वय्। रीतिरहितं काव्यं काणत्वादिदोषयुक्तं शरीरमेव प्रतिभाति। अतः साधूच्यते बामनेन रीतिरात्मा काव्यस्य इति।

**ध्वनि सम्प्रदायः–** ध्वनिनाति गभीरेण काव्यतत्वनिवेशिना आनन्दबर्धनः कस्य नासीदानन्दवर्धनः इत्युक्तं कविशेखरेण राजशेखरेण। अति गभीरं ध्वनि स्वरूपं सहृदयानां पुरतः प्रतिष्ठाप्य आनन्दवर्धनः केषां मनसि आनन्दं जनयति। सन्ति बहवः प्रस्थानाः साहित्य प्रपचें अतः अक्षरसत्यमेतत्।

आचार्य आनन्दवर्धनः ध्वनेः–आवश्यकतामनुभूय ध्वनिसम्प्रदायं प्रवर्तितवान्। आनन्दवर्धनः ध्वनि विषये विचारं कर्तुं प्रारभते एवं काव्यास्यात्मा ध्वनिरिति बुधैः यः समान्मातपूर्वः इति। सः अभिप्रायत्रयं प्रस्तौति यत् पूर्वालंकारिकैः ध्वनिविषये प्रकटितम्। केचित् ध्वनिः नास्तीति वदन्ति, पुनः अन्ये तं ध्वनिं

भाक्तं वदन्ति। केचन ध्वनेः स्वरूपमेव वाचामगोचरमिति कथ्यते। तस्यात् सहृदयानां मनः प्रीतये ध्वनेः स्वरूपं वयं ब्रूमः? इति उक्त्वा आनन्दवर्धनः ध्वनेः उपस्थिती, स्वरूप स्वभाव भेदानि प्रतिपाद्य ध्वनिसम्प्रदायक स्थापक नाम्रा प्रसिद्वोऽभूत्।

साधारणेन मानवानां सम्भाषणे अपि ध्वनिरूपं प्रतिभाति। यथा वाक्य श्रावणेन तत् वाक्य पदविभाग अन्वयस्य अर्थात् अन्य अर्थं स्फुरति तदेव ध्वनिः। एवं ध्वनि शब्देन व्यञंकशब्दस्य, व्यञंकार्थस्य, व्यग्डयार्थस्य, व्यञंना व्यापारस्य, व्यग्डयप्रधानकाव्यस्य च ग्रहणं संजायते। किन्तु काव्यशास्त्रे अभिधा, लक्षणा, व्यजंना चेति तिस्त्रे वृत्तयः स्वीक्रियते। अभिदा वाच्यार्थप्रधाना, लक्ष्णा लक्ष्यार्थप्रधाना, व्यजंना व्यग्डयार्थप्रदाना, अतः तदेव ध्वनिः।

यः अर्थः काव्यात्मरूपेण स्थितः सहृदयवेद्यः श्लाघ्यश्च सा द्विधा वर्तते। वाच्यः प्रतीयमानश्च। तत्र वाच्यस्तु प्रसिद्वः एव यः उपमादिभिः अलंकारैः बहुप्रकारैः प्रदर्शित भामहादिभिः प्राचीनैः आलंकारिकैः। अत एव तस्मिन् विषये नूतनतया किमपि वक्तव्यं नास्ति इति उक्त्वा आनन्दवर्धनः प्रतीयमानं वस्तु एवं वर्णयति।

**प्रतीयमानं पुनरन्यदेव, वस्त्वस्ति वाणीषु महाकाबीनाम्। वत्तत् प्रसिद्वावयवातिरिक्तं, विभाति लावण्य मिवाग्डनासु।। (ध्वान्योलकं 1,4)**

वाच्यात् भिन्नं अन्यत् वस्तु अस्ति, यथा अग्डनासु लावण्य शोभा समुल्लसति। ईदृशं प्रतीयमानं साधारण वास्येषु न, किन्तु महाकबीनां वाणीषु एव वर्तते इति वर्णनेन आनन्दवर्धनः वाच्यात् प्रतीयमानं बहुधा भिन्नमिति, गुण, अलंकार, रीत्यादेः गणनीयं इति सोदाहरणं निरूपयति। सहृदयवेद्य ध्वन्यैव प्रतीयमानम्। ध्वनिरात्मा काव्यस्य इति सिद्वान्तेन ध्वन्यालोक आविर्भावमकरोत् आनन्दवर्धनाचार्यः। तत् ग्रन्थे गुणलंकारयोः अपि समुचित स्थानं दीयते तेन। ध्वनिः सः द्विधा विभज्यते एवं संलक्ष्यक्रमध्वनि, असंलक्ष्यक्रमध्वनि इति। संलक्ष्यक्रमे व्यग्डयध्वनौ व्यग्डयार्थ प्रकाशस्य पौर्वापर्यक्रमों लक्ष्यते। असंलक्ष्यक्रमे व्यग्डयध्वनौ च शतपत्रभेदनन्यायेन पौर्बापर्यं न लक्ष्यते। वस्तुध्वनि, अलंकारध्वनि द्विधा संलक्ष्यक्रम ध्वनेः रूपानि। रसध्वनि असंलक्ष्यक्रमध्वनेः रूपम। रसध्वनि न केवलं रसविषये अपितु रसं, भावं, रसाभासं, भावाभासं भावोदयं भावशान्ति, भावसन्धि, भाव शबलता विषयोऽपि ध्वनि अस्ति एव। एवं विधानेन आनन्दवर्धनः ध्वनिरात्मा काव्यस्य इति प्रतिपादयति। अत्र ध्वनिवादस्य अभिप्रायानुसारं रमणीयत्वं शब्दमूलकं, अर्थमूलकं, शब्दार्थोभयमूलकं च। अपितु ध्वनि काव्ये ललनालावण्यत् अपूर्वं रम्यत्वं प्रतीयमानर्थ च द्योतयति।

**वक्राक्ति सम्प्रदायः–** वक्रोक्तिः वचो भगिंमा एव। एषः वचोभगिंमा एव उक्तौ शोभां आदधाति। उक्तौ चमत्कृते चारूतायाश्च संपादन वक्रोक्तिरेव सम्भाव्यते। अतः वक्रोक्तिः काव्यजीवितम् इति प्रतिपादयति राजानक कुन्तकः उक्तौचित्यं चमत्कृतिर्वा वक्रोक्ति इति, वक्रोक्ति हीनं काव्यं निर्जीवमिति, वक्रोक्तेः विशेषता एव काव्यप्रतिभामूलमिति कथ्यते वक्रोक्ति सम्प्रदायस्य प्रवर्तकः कुन्तकः।

वक्राभिधेयशब्दोक्तिरिष्टा वाचामलंकृतिः, यन्त्योस्यां कविना कार्यः इत्युक्त्वा वक्रोक्ति सिद्वान्तस्य उद्ववं सम्भवति। वक्रोक्ते उद्ववं प्रप्रथमं ध्वनिसम्प्रदाय मूलकमेव, आनन्दवर्धनाचार्येन प्रतिपादितं ध्वनि सिद्वान्तस्य नौराश्यं आप्ता कुन्तकः काव्यस्य मूलतत्वं अन्वेषयन्तो वक्रोक्तिं समासादयन्।

मानव जीवन नित्यसम्भाषणेऽपि एका रमणीयता, एकातिशयं, एकं विशेषं स्यादिति चेत् तत् वक्रोक्तिः, अतिशयोक्तिः वा भवति।

भामहस्य अभिप्रायान् ग्राह्वा कुन्तकः वक्रोक्ति जीवितम् इति प्रामाणिक ग्रन्थे वक्रोक्ति सम्प्रदायस्य स्वरूपं उपस्थापयति। वक्रोक्ति जीवित रीति, रस, गुण अलंकारयोः समालोचनं अपि भवति। कुन्तको भामहेन, दण्डिना च प्रेरणाम् अवाप्य स्वभावोक्तवपि वक्रोक्तेदर्शनं कुरूते। एवं स्वभावोक्ति अलंकारमिति, वक्रोक्तिः कथ्यते। कुन्तकानुसारं काव्यशोभाकराः सर्वोऽपि धर्माः वक्रोक्ति जन्या एव। काव्यशोभाहेतुकतत्तवे वक्रोक्तिरेव प्राधान्यमिति तस्य अभिप्रायम्। कुन्तकः वक्रोक्तिं न तु काव्यात्मा अपितु काव्यजीवितमिति कथ्यते।

**कुन्तकाचार्यः वक्रोक्ति षोढा विभजति। ते षट् भेदाः–**

(1) वर्णविन्यासवक्रता (2) पदपूर्वार्धवक्रता (3) पदपरार्थवक्रता (4) वाक्यवक्रता (5) प्रकरणवक्रता (6) प्रबन्धवक्रता चेति। तेन प्रत्येकस्य भेदस्यानेके भेदाः वर्णिताः। पूर्वोक्त विभाजनेन ज्ञायते यत् वक्रोक्तेः विस्तारः वर्णादारभ्य प्रबन्धं यावत् वर्तते। एतत् अन्तर्गतमेव भाषा, प्राकृतिक वर्णना, अलंकार विवरणं, ऐतिहासिक तथ्य संकलनम्, रसप्रयोगः, काव्यस्वरूपं, काव्यप्रयोजनानि, काव्यहेतवः, काव्यरीतयः काव्यसन्देशादिकं च तथा सूत्ररूपेण उपलभ्यन्ते, येन परवर्तिन्याः साहित्यक समीक्ष्याः सरणिः भवति। कुन्तकेन प्रतिपादितं अनेक काव्यसम्बन्धितविषयाः प्राचीनाधुनिक पाश्चात्यालंकारयोः अभिप्रायनां सादृश्यरूपं धारयन्ति। एवं काव्यनिर्वचने, अलंकार अलंकार्य निर्णये, रीतिविवरणें कुन्तकस्य अभिप्रायाः मौलिकं एवं अत्याधुनिकं च भवन्ति। कुन्तकस्य वक्रोक्तिः पूर्वाचार्यायोः काव्यतत्तविचारयोः समन्वयमिव भासितं नूतन सिद्वान्तम् इति।

अतिशयोक्तिं वक्रोक्तिं च पर्यायत्वेन गणयति भामहः। अतिशयोक्ति मूलैव वक्रोक्तिः, तदेव सर्वालंकाररूपा, सर्वेषां अलंकाराणामपि मूलभूतम्। वक्रोक्ति हीना अलंकाराः अलंकाराः अलंकारमात्रमेव। आचार्य दण्डिनः

अपि काव्यं स्वभावोक्ति, वक्रक्तिरिति द्विधा विभजति। आनन्दवर्धनाचार्यः सर्वालंकाररूपा वक्रोक्तिः इति प्रतिपादयति। अत एव आनन्दवर्धनस्य ध्वनिसिद्धिान्त अविरोधी कुन्तकः। वक्रोक्तिः एव काव्यजीवितम् इति घण्टापदनिरूपणा कृत्वा कुन्तकाचार्यः वक्रोक्ति सम्प्रदायस्य अविर्भावमकरोत्।

**औचित्य सम्प्रदायः–** अलंकार सम्प्रदायाः सर्वम् औचित्यस्य प्राधान्यं अंगीकुवन्ति। कस्यापि मतस्याविरोधी च सम्प्रदायमिदं क्षेमेन्द्रेण प्रवर्तितम्। काव्यस्य सर्वेष्वपि अग्डेंषु औचित्यं नितान्तमपेक्षितम् अनौनित्येन नीरसं काव्यं इति मन्ये औचित्य विचारचर्चायां औचित्यस्य प्राधान्य उन्नतेन उपस्थापयति क्षेमेन्द्रः। आदेशजो हि वेषस्तु न शोभां जनयिष्यति इति नाटयशास्त्रे एव औचित्यसम्प्रदायस्य बींज दृश्स्ते। एवमेव औचित्यस्य वैभवं प्रस्तौति आनन्दवर्धनः

**अनौचित्यादृते नान्यद्रसभग्डस्य कारणम्।**

**प्रसिद्वौ चित्यबन्धस्तु रसस्योपनिषत् परा।।(ध्वन्यलोकं 3,14)**

अत्र आनौचित्यं बिना न किचिंत् रसभग्डंस्य कारणं अन्यत् नास्त्येव। प्रसिद्व औचित्यबन्धः रसस्य परा उपनिषत्। रस सिद्वये परमं रहस्यम् इति। अत एव भरतः नाटयशास्त्रे प्रबन्धविषये नियमा उक्ताः। एतत् नियमानुसारमेव नायकस्य औचित्य, अनौचित्य विषये कविः व्याकुलत्वं न प्राप्रोति। उत्पाद्य वस्तु कविना यदि नाटके प्रयुज्यते, पुनः अप्रसिद्वा अनुचित नायक स्वभावः वर्ण्यते च तदा महान् प्रमादः सम्भवति इति। एतदेव विषयं ग्राह्य क्षेमेन्द्रः औचित्यमेकं सम्प्रदायमिति स्थापितवान् शब्द, अर्थ, गुण, अलंकार, रस सम्बन्द्व औचित्यानि सोदाहरणेन सः निरूपयति। अनौचित्य दोष निरूपणेक्षेमेन्द्रः प्रसिद्वकाव्योः काव्ये स्थितं दोषाः अपि निर्भयेन प्रकटयति औचित्यविचारचर्चायाम्। विभिन्नतत्वं संमिश्रणं औचित्यसम्प्रदाये दरीदृश्यते। अत्यावश्यक काव्यतत्वं औचित्य सम्प्रदायम्। समुद्रबन्धीय विवेचनानुबद्वोऽपि अयं सम्प्रदायः सर्धैरादृतः। औचित्यमेव रसस्य रहस्यमिति क्षेमेन्द्रस्य सिद्वान्तः। तच्चौचित्यं बहुधा भिन्नां पदवाक्य प्रबन्धार्थ गुणालंकार रसक्रियाकरणलिग्डेषु औचित्यं विचार्य औचित्यस्योपनिबन्धस्तु रसस्योपनिषठोरति तेन प्रपच्जितम्। विश्व साहित्ये यदि गद्यकाव्यं वा, पद्यकाव्यं वा, गीतं वा, अभिनेयं वा, यंः प्राचीनाऽपि, आधुनिकेऽपि प्राच्यादि भाषा काव्यमपि, पाश्चात्यादि काव्यमपि इत्यादि एनकेनापि प्रत्येक प्रतिभावितं भासितं प्रतीकाव्य वैशिष्टयं शोध्यति, मार्ग निर्देशयति शास्त्रमिदं साहित्यशास्त्रम्। एवं प्रोच्यते विद्वदिभः इदं शास्त्रस्य प्रामाण्यम्–

**काव्यानां सततमपाश्रयोऽलिखानां तेषुकान्त च विरूणद्वि कांच्श्रिदर्थान्।**

**श्रद्वेयं ननु सदलंकृतीड्यशास्त्रं माद्यस्थ्याड्भवति न कस्य वा प्रमाणम्।। इति**

भारतीय साहिती क्षेत्रे काव्यातत्वज्ञैः साहित्यशास्त्रवेतैः आविष्कृत अलंकार, रस, रीति, ध्वनि, वक्रोक्ति, औचित्य सम्प्रदायेषु एनकेनापि सम्प्रदायं भारतीय भाषयां विरचितं केचित् काव्यऽपि अनुवर्तन्ते। यदि पुराणमित्येव न साधु सर्वं इति भावराहित्येन साहित्यशास्त्र प्रतिपादित विषययानि सावकाशेन अवलोकनं क्रियते चेत्, तर्हि न केवलं भारतीय साहित्यम् अपितु सकल प्रपच्ज भाषा साहित्यात् इदं सम्प्रदायसमूहं समन्वयिष्यति, भारतीय साहिती वैभवं प्रकाशयति।

## सन्दर्भ


1. ऋग्वेदः
2. विक्रमाक्डदेवचरितं
3. नाटयशास्त्रम्
4. काव्यलंकारः
5. काव्यादर्शः
6. काव्यालंकार सूत्रवृतिः
7. प्रातपरूद्रीय व्याख्या
8. वक्रोवितजीवितम्
9. चन्द्रलोकम्
10. ध्वन्यालोकः